# ROLL DESCRIPTIONS

ROLL NO. WITH CENTRE CODE 001 0481

DATE OF FILMING 20 - 04 - 91

NAME OF THE CENTRE/COLLECTION Saraswati Bhawan Library, Varanasi.

DETAILS OF CATALOGUE (SUB/VOL.) Veda.

LANGUAGE Sanskrit

SCRIPT Devanagari, Chitram

MATERIAL Paper

TOTAL FRAMES 604

ORIGINAL FILM USED Kodak

FOOTAGE

## RETAKES INFORMATION

| MSS. NO. | FOLIO NO. | REMARKS |
| --- | --- | --- |
| | | |

Indira Gandhi National Centre for the Arts

प्रवेश सं० ५५०८ विषय: कर्मकाण्ड क्रम सं० 20

ग्रन्थकार अनन्तदेव:

नाम विष्णुयागपद्धति:

पत्र सं० १-१९

श्लोक सं०

अक्षर सं० (पंक्तौ) ४७ पंक्ति सं० (पृष्ठे) १२

लिपि: दे० ना०

आधार: कागज़

आकार: ११.५"×६"

वि० विवरणम् पृ०

पी० एस० यू० पी०--९९ एम० पी० ई०--१९४२--५०,०००

008595 प्रा. (२०९१)

Indira Gandhi National Centre for the Arts

प्राचीन सङ्ग्रह

नं. २०८१

BENARES

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशाय नमः॥ सहस्रशीर्षादिविधो यदुक्तः पुमान् जगज्जन्मनिबीजभूतः। वेदैः प्रणम्यामुममुष्य नुसेव वक्ष्ये व्रतदेव
तयज्ञभेदान्। ऋग्विधाने। शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे। द्वादश्यां पुत्रकामाय चरुं कुर्वीत वैष्णवं। दंपत्योरुपवासः स्या
देकादश्यां सुतालये। ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनं। चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया। प्राप्नुयाद्वैष्णवं पुत्र
मचिरात्संततिक्षमं। द्वादश द्वादशीः सम्यक् श्रपयसा निर्वपेच्चरुं यः करोति स हव्यं स्यात् ख्याति विष्णोः परं पदं। हुत्वाग्निं विधि
वत्सम्यगृग्भिः षोडशभिर्द्विजः। कृतांजलिपुटो भूत्वा स्तुवंताभिः प्रयोजयेत्। केशवं मार्गशीर्षे तु पौषे नारायणं स्मृतं। मा
धवं माघमासे तु गोविंदं फाल्गुने तथा। चैत्रे चैव तथा विष्णुं वैशाखे मधुसूदनं। ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः
। श्रावणे श्रीधरं विद्यादृषीकेशं ततः परं। आश्विने पद्मनाभं तु दामोदरं च कार्त्तिके। द्वादशैतानि नामानि ऋग्भ्यश्च गोब्रवी
न्मुनिः। पूजयेन्मासनाम्नाभिः सर्वान्कामान्समश्नुते। आयुष्मंतं सुतं सते यशोमेधासमन्वितं। धनवंतं प्रजावंतं धार्मि
कं सात्त्विकं तथा। समिधोऽश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्सुनः। उपस्थानं तु तादृग्वधात्वार्च्य मधुसूदनं। हविर्हीमं ततः कु
र्यात्प्रत्यवायपतः शुचिः। सूक्तेन जुहुयादाज्यमावर्तने च पूर्ववत्। हविःशेषं नमस्कृत्वा नारीनारायणं पतिं। प्राशयेत्ता
ल्लाहविःशेषं लब्ध्वा पत्नी संविशेत्सुतां। द्वितीयास्त्रीनिवर्तेत याव ऋग्भिर्न विंदति। अपुत्रा मृतपुत्रा वा या च कन्याप्रसूयते।
विःशेषं लब्ध्वा पत्नी संविशेत्सुतं। यत्कृत्वा मुनयः सर्वे ब्रह्मनि
ष्ठिं प्रंसाजनयेत्सुतं ऋष्यशृंगो यथाब्रवीत्॥ अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः॥ यत्कृत्वा मुनयः सर्वे ब्रह्मनि
र्वाणमापुयुः॥ अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च। वदस्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं। अग्नौ क्रियाव ॥१॥

---

तां देवो दिवि देवो मनीषिणां। प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः। आपो ह्यायतनं तस्य तस्मात्तासु सदा हरिः। तस्य
सर्वगतत्वाच्च स्थंडिले भाविनात्मनः। दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव च। अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं। आ
नुष्टुभस्य सूक्तस्य त्रिष्टुभं तस्य देवता। पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः। नारायणमहाबाहो श्रृणुष्वैकमना
: प्रभोः वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति। अग्निकार्यं जपविधिं स्तोत्रं चैव नराग्रकं स्नात्वा यथोक्तविधिना प्राङ्मु
खः शुद्धमानसः। प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्। पंचमीं वामजा
नौ तु षष्ठीं तु दक्षिणे न्यसेत्। सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे कटौ। नवमीं नाभिमध्ये तु दशमीं हृदये न्यसेत्। ए
कादशीं कंठदेशे द्वादशीं वामबाहुके। त्रयोदशीं दक्षिणे चास्ये चैव चतुर्दशीं। अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्य
सेत्। एवं न्यासविधिं कृत्वा पश्चात्पूजां समारभेत्। यथा देहे तथा देवे न्यासं कृत्वा विधानतः। आद्ययावाहयेद्देवमृचा
तु पुरुषोत्तमः। द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया। अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीयकं। षष्ठ्या स्नानं प्रकुर्वीत
सप्तम्या वस्त्रमेव च। यज्ञोपवीतमष्टम्यानवम्या चानुलेपनं। पुष्पं दशम्या दातव्यं एकादश्या तु धूपकं। द्वादश्या दी
पकं दद्यात्त्रयोदश्या निवेदनं चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणां। स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं।
दक्षिणां तु यथाशक्त्या षोडश्या तु प्रदापयेत् ततः प्रदक्षिणं कृत्वा जपं कुर्यात्समाहितः। यथाशक्ति जपित्वा तु सूक्तं न
म्रो निवेदयेत्। देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा। कारयेत्प्रथमेनैव द्वितीयेन तु प्रोक्षणं। तृतीयेनाग्निमाद

Indira Gandhi National
Centre for the Arts

वि० प्रा०

॥२॥ धान्चतुर्थे नसमिंधनं·पंचमेनाज्यमग्रयतां·चरोश्चश्रपणं तथा·षष्ठे नैवाग्निमध्ये तु कल्पयेत्सम्यमासने·चिंतयेद्देवदेवे
शं कालानलसमप्रभः ततो गंधं च पुष्पं च धूपदीपनिवेदनं·अनुज्ञाप्य ततः कुर्यात्सम्यग्गादि यथाक्रमं·समिधास्तावतीः
पूर्वं तु दुयाद्घृताक्तिताः। ततो घृतेन जुहुयाच्चरुणा च ततः पुनः। एवं हुत्वा ततश्चैवानुज्ञाप्य च यथाक्रमं·अग्नेर्भगवत
पूर्वेनुज्ञ·देवानां दासस्य समीपे स्तोत्रमुच्चरेत्·जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन· नमस्तेस्तु हृषीकेश महापुरुष पूर्वज·अथ
नथानां च ब्रह्मान्यमधिदैवतं·सर्वदा चरणद्वंद्वं व्रजामि शरणं तव· एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा·अध्य
क्षश्चानुमंता च गुणमायासमावृतः। संसारसागरं घोरमनंतं क्लेशभाजनं· त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः
। न ते रूपं न चाकारो नायुधानि न चास्पदं·तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे· नैव किंचित्परोक्षं ते प्रत्यक्षो-
पि न कस्यचित्· नैव किंचिदसाध्यं ते न च साध्योसि कस्यचित्· नैव
किंचित्प्रसिध्यं ते न च सिद्धोसि पातकः। कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमं· योगीनां परमा सिद्धिः परमं ते
परं विदुः। अहं भीतोस्मि देवेश संसारेस्मिन्भयप्रदेः। त्राहि मां पुंडरीकाक्ष न जाने परमं पदं· कालेष्वपि च सर्वे
बुद्धिषु सर्वासु चाच्युत· शरीरं जगतोवापि वर्द्धते मे महद्भयं· त्वत्पादकमलादन्यन्मे जन्मांतरेष्वपि· विज्ञानं
यदिदं प्राप्तं यदिदं स्थानमार्जितं· जन्मांतरे मे देव मा भूदस्य परिक्षयः। दुर्गतावपि जातायां त्वद्गतो मे मनोरथः
। यदि नाशं न विदेत तावदस्मि कृतीसदा· कामये विष्णुपादौ तु सर्वजन्मसु केवलं। पुरुषस्य हरेः सूक्तं सर्वध- ॥२॥

न्यं पवित्रं परं· आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परं· फलहारो जपेन्मासं पंचदपस्यामानमात्मनि: फलानि भुक्तो
पवसेन्मासमाद्यन्त्रवर्तयेत्· अरण्ये निवसन्नित्यं जपन्निमधुंसदा· त्रिस्त्रिषवणकालेषु स्नायादप्सु जपेत्तच· आदि-
त्यमुपतिष्ठेत सूक्तेनानेन नित्यदाः। आज्याहुतीस्तेनैव हुत्वानोचिंतयेद्धविं। उर्ध्वे मासाफलाहारस्तो भिर्वर्षैर्जपेदिदं। तद्
रूपत्वं मनायुक्तो दशवर्षाण्यनन्यभाक्· साक्षात्पश्यति तं देवं नारायणमनामयं॥ अद्यमत्यंत यत्नेन सूक्तं जगतोप्य-
पमितिः स्वतदनंतरं महारौवेऽधिकः पाठः। अथ नासाधमानोपि भक्तं न परिहापयेत्· भक्तानुकंपी भगवान्ज्ञापयेत्पु
रुषोत्तमः। येन येन च कामेन जपेत्तस्य पतः सदाः स सकामः सम॒स्याद्धुदं धानस्य कुर्वतः। होमवाप्यथ वाज्यमाय
मुपहारमनुत्तमं· कुर्वंति येन कामेन तत्सिद्धिमवधारयेदिति· अस्यार्थः। तत्र सम मित्यं ते नैकः काम्यप्रयोगोभिधीय
ते· कृष्णैकादश्यामुपक्रम्यायुतं जपित्वा शुक्लैकादश्यां होमः। स्थंडिलं दक्षिणभागे वस्य मार्गशीर्ष्या षोडशार्चेस्
क्तेन विष्णुं संपूज्य स्थंडिले कुंडे वा पूज्यः दक्षिणभागे स्थिस्वगृह्योक्तविधिना चरुपं यति श्रपयन्पुरुषसूक्तं पठेत्·तेन
विधिनाज्यभागांते कृते सूक्तेन सहस्राहुतीर्जुहुयात्· सकलमपि सूक्तं होमसाधनं न तु स्यत्येकमच इति महारौवः। य
द्यपि मूले च रुमात्रमुक्तं। तथापि पायसश्रपणं वरत्तो महारौवस्याप्यमाध्यमः। महाभारते मोक्षधर्मेषु तुलाधारजा
जलि संवादनंतरं पठितविचक्षुः। गीतायां वै भवयाग साधनत्वेनाप्तिपापस्रविधिः। अनवस्थित मर्यादैर्विमूढैर्ना
स्तिकैर्नरैः। संशयात्मभिरव्यक्तैर्हिंसासमनुवर्त्तितेत्यादिना॰ हिंसायुक्तयज्ञनिंदापूर्वकं पठितश्लोकेषु·विष्णु

Indira Gandhi National
Centre for the Arts

मेवाभिजानंतीति सर्वयागेषु ब्राह्मणाः॥ पायसैः सुमनोभिश्चैतस्यापि यजनं स्मृतं· यत्तिथ्यादौ एवमेव ब्रह्मादेवेषु परि
॥३५ मेवाभिजानंतीति सर्वयागेपुब्रासणाः॥पायसैः सुमनोभिश्चतस्यापियजनंस्मृतं· सर्वदेवार्हमेवतदिति· वस्यमाणावै
कल्पिताः। यस्यापि किंचित्कर्तव्यमन्नं चोसैः सुसंस्कृतं। महासत्वे· शुद्धभावे· सर्वदेवार्हमेवतदिति· वस्यमाणावै
अव यत्नांतरेषु पायसविधेः स्पष्टत्वाच्च न पायसे इति वक्तुवचनस्य निरालंबत्वं· सुमनोग्रहणां च· इयास्पुरुषसू
क्तेन य· पुष्पाण्यपएव चेति कथिताद्यर्यं· ब्राह्मणां देवार्हत्व कथनं मंडपहोम्य समिदाद्यायं· अन्नमात्रस्य देवा
र्हत्व कथनं तरद्देक ब्राह्मणाभोजनाद्यायं· चोसैः शुद्धैरित्यर्थः। आस्तां प्रसंगागतं भारत व्याख्यानं· प्रकृतमनु
सराम्:। द्वादशोत्याध्यावृत्तीत्यनेन द्वितीयः प्रयोगो मुमुक्षुप्रतिनृतीयः पुत्रकामं प्रतीचविधीयते· अत्रापि महार्णवे
कः पाठः अथापरः प्रकारो यमेकादशाममभोजनं· दंपत्योः पुरुषस्तत्र नित्यकर्माविरोधिनिः कालेजपेदिदं सूक्तमेकाद
शानिरंतरं· द्वादश्यां प्रयतो भूत्वा पयसाश्रपयेच्चरुं द्वादशाद्वादशीष्वेवं पयसा निर्वपेच्चरुमिति· सहस्रं स्यादितिचरुणां
संख्येति केचित्· आहुति संख्येत्यपरे· यातिविष्णोः परं पदमित्यनेन च सोधनः परमाप्नोति तद्विष्णोः परमं पदमिति
कठोपनिषत्प्रसिद्धमुक्तेः फलत्वमुच्यते· ताभिः पुरुषसूक्तर्भिरनिस्वस्य नारायणास्तुत्यंते मासनामभिः पूजाक्र
र्येत्याह· केशव मित्यादिना· मार्गशीर्षमित्येवास्य प्रक्रम्य इत्यस्य तो लभ्यते· पुत्रप्राप्त्यर्थप्रयोग विशेष वक्तुप्रक्र
मते· आयुष्यमित्यादिना· ऋग्विधान भाष्ये समिधोध्वत्स्य वृक्षस्य नु हुयाच्छतं शतमिति पाठं लिखित्वोक्तं· अ
श्वोत्तर शतप्रभृति होतव्या इति उपस्थानमाग्नेयमंत्रेरिति महार्णवः। पुरुषसूक्तेनेत्यन्ये· अस्य द्वादश्यां कर्मी ॥३॥

तेयस्याः पुत्रलाभायकर्मैतत्कृते साहविः शेषं नमस्कृत्य नारायणं बुधापतिं च नमस्कृत्य हविः शेषं भक्षेत्· आ
पत्नं परित्यज्य भक्षणानंतरं वा यशाविनी भवेत्· यावज्जू सागर्भं न विंदति तावदन्यां भार्यामृतुमतीमनगच्छेत्·
तत्र वृत्तिवधप्रसक्तौ साप्यनतवस्थाया अज्ञिताल्पकत्वं कल्प्यं· अतश्च प्रश्नतु शाकस्य प्राजापत्यः अशाकस्य त्रि
रात्रादिरिति महार्णवः। अथोक्त वक्ष्यमाणकाम्यप्रयोगोपयोगिनं चार्चनविधिः। महार्चनमिति· उक्तपूजास्थाने
बुध्यवस्था महान्नाविति· क्रिया अग्निहोत्रादिः। दिविषु लोकस्थेसूर्यमनीषामंडलस्थमननशीलनाः भावि
तो जपादिना संस्कृत आत्मा येषां वक्ष्यमाणोर्चनविधावशक्तं प्रति संक्षेपणाराधनप्रकारमाह· इयास्पुरुषसूक्ते
नेति· संगृह्यते चात एव दिष्टानां पुरुषसूक्तेन गंगादावभिषेकमात्राचारः। सूक्त संबंधिद्दृढः प्रभृति वक्तुमाह
नुष्टुभस्येति· अर्चनकथनं नारायणार्पणं भवेदित्याद्ययेनाह नारायणोति· तदात्मकमिति· सर्वमप्यर्चनविधानं
नित्यविषयत्वेन नित्यात्मकमित्यर्थः। अतः एवोक्त पुत्रार्थकाम्यविधौ होममात्रेश्रुते जपकर्तव्यत्वापि महार्णवो
त्वाघटते· अपुनः जपेन सहस्रहोमं वृदनाच सर्वत्र जपदशांशेन होमः कर्तव्य इत्यपि तत्रैव सूचितं· केचित्तु
रश्वरणवत्तर्पणाद्यपीद्दति· तन्नः गृह्येमधीयवद्भुते नैव कथंभावोपशमात्· शुद्धमानस इति संकल्पो विधीयते·
अत एव महार्णवे सविधिं कृत्वा पश्चाद्यागं समारभेदिति· प्रयोगपारिजाते ऋग्विधानभाष्ये च पाठः। महार्णवे
तु· एवन्यासविधिं कृत्वा पंचाङ्गानि समारभेत्· ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पंचांगकल्पनेतिपाठमुदाहृत्योक्तं·

Indira Gandhi National Centre for the Arts

॥७॥ आश्वलायनशाखोक्तस्वपाठक्रमो युक्तः। ब्राह्मणोस्य हृदयायनम इति हृदये· चंद्रमामनसेति शिरसेस्वाहे
ति शिरसि· नाभ्या आसीदिति शिखायैवषट् शिखायां· सप्तास्यासन् कवचायहुमिति कवचं· पत्तेनयत्तमिति
अस्त्राय फडित्यस्त्रं· आश्वलायनशाखिनः प्रतितच्छाखीयक्रमनियमवैयर्थ्यादन्यशाखिनामप्यधिकारो यो
ग्यत्तेयथेति· इत्थमेव न्यासद्वयं पूज्यविष्णुमूर्तावपि कर्तव्यमित्यर्थः। आद्येयेत्यतः पूर्वं प्रयोगपारिजातेऽधि-
कःपाठः। गंधमाल्यैरभिहितैरास्नानं चार्चयेद्बुधः॥ ततः पीठं समाराध्य गंधपुष्पाक्षतैः शुभैरिति· ततः स्नानानि
भगवत्पूजां बहिः पीठपूजां च कृत्वाऽवाहनादिकार्यमित्यर्थः॥ तत्र वस्त्रानंतरं तद्भूषणादि स्याभरणं। भाष्येतु· स्तु
ईशेनाभरणदानमुक्तं पठितं· पात्रशुद्धि· चाभिघारप्रक्षेपादिनिवेदनं। कुर्यात्स्वचदर्शनेनैवचाचार्चामेपूर्ववत्तथेतिः
पूर्ववत्संचक्षुम्यर्चेत्यर्थः। ततश्च स्नानांतराचमनमपि नैवेद्यसाहाचर्यादित्थमेव बोध्यं· प्रयोगपारिजातेत्र-
योरक्षोपहारकं· चतुर्दशपाजलं दद्यात्स्वंचरदयापरदासिरां· षोडशेषाह्वासनं कुर्यादेवमेव समर्चयेदित्युक्तो कृत्स्ना
नैवस्त्रोपवीते च चरौ चाचमनीयकं· हुत्वा षोडशभिर्मंत्रैः षोडशान्नस्य चाहुतीः। दोषं निवेदयेत्तस्मै दद्यादाच
मनं तत इति· पराशरमाधवीयेतु· आहुतीरित्यनंतरं· पुनः षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि षोडश· षण्मासा-
त्सिद्धिमाप्नोति ह्येवमेव समर्चयन्नित्युक्तं· उक्तहोमोपयोगिस्थंडिलादिविधिमाह· देवस्येत्यादिना· प्रथमे
नप्रथमर्चाः महार्णवेत्वित्थमेवपाठः। एवमग्रेपि· समिंधनं समित्प्रक्षेपः। आज्यस्य श्रपणं विलापनं· चरोश्चेति
॥७॥

नस्यैवमंत्रस्यावृत्तिरित्याशयः॥ चिंतयेदिति तस्मिन्वासन इति शेषः। षष्ठे नैवेद्यनुषंगः। महार्णवेधिकः पाठः॥
विस्तृतास्यं चारुशीर्षरक्तास्यं रक्तलोचनमिति· वाहो वहय इति तत्रैव व्याख्यातं· सप्तस्यादीनि अग्नौ चिंतितस्य भव-
तोऽनुज्ञाप्यार्घ्यं चिंतितया ब्राह्मणरूपेणानुज्ञया सूक्तांतर्गताभिः सप्तस्यादिभिर्ऋग्भिः पंचोपचारैः पू
जनं कार्यं· आचमनं तांबूले अप्यत्र देय इति संप्रदायः। एवं हुत्वेति प्राप्तस्य पुनः संकीर्तनमविरुद्धानां पूर्वोत्तरां
गानां स्वगृह्योक्तरीत्या प्रयोगानुज्ञापनार्थं· भाष्ये यथाक्रममित्यस्य सप्तस्यादृचा क्रमेण समिदादिहोमं प्रतिप्र
त्येकमंगलाज्ञापनार्थत्वमंगीकृत्य दशैव समिदाहुतीर्दद्यादाज्याहुतीर्दश चर्वाहुतीश्च हुत्वा पर्युक्ष्याग्निं समाप
येदित्युक्तं· अत्रानुज्ञास्वीकारो होमार्थः पूर्ववद्बोध्यः। अग्नेरिति अग्नेः समीपे तस्याग्नौ चिंतितस्य भगवतो वि
ष्णोस्तोत्रमुच्चरेदित्यर्थः। पूर्वजेत्यनंतरं नमो हिरण्यगर्भायप्रधानाव्यक्तरूपिणे· ओं नमो भगवते वासुदेवाय
शुद्धसत्त्वस्वभावायेति पठित्वा देवतानामित्यादि पठितं महार्णवे· दुर्गतावपीत्यादिपाठांतरं तत्रैवोक्तं· दुर्ग
तावपि ज्ञातानां त्वं गतिस्त्वं मतिर्मम· यदि नाथं च विंदेयं तावता सिद्धकृती सदा· अकामकलुषचित्तं मम ते पाद
योःस्थितं· कामये वैष्णवत्वं च सर्वजन्मसु केवलमिति· उक्ताराधनस्येव विशिष्टजपादियोगेन विशिष्टफला
प्रयोगान्वकुतद्वेषभूतास्तुतिमाह· पुरुषस्येति श्लोकेन· अघफलविशेषयास्येव सूक्तस्य नानाविधजपविधौ
न्दीयतिफलाहार इति· पद्यतीति मोक्षजनकसाक्षात्कारलाभेन मुक्तियोग्यो भवेदित्याशयः। भुक्तेतिकार्यो

Indira Gandhi National
Centre for the Arts

॥५॥ मुख्यं व्यारापस्यापिती निवद्धोर्थः । अर्द्धिकेतिः तस्मिन्नेव मासे फलानामप्राप्तिरित्यभिप्रायं न तु मासांतराभिप्रायं
अग्रे ऊर्ध्वं मासादिति मासैकत्वस्यैवानुवादात् । सर्वं पुरुषसूक्तात्मको मंत्रः । जपान्नित्यस्य मध्यमतीन्यायेन
वासः स्नानाभ्यामन्वयः । वासो जपांगत्वेन विधीयते · जपस्नानादित्येतत्तु महार्णवे व्याख्यातं पुरुषसूक्तां
तर्गताभिः समस्ताभिर्ऋग्भिः स्नानकाले मार्जनं कुर्यादिति · अप्सु जपेत चेत्येतच्च तत्रैव व्याख्यातं · ताभिरेवा
ऋग्भिरघमर्षणं यथाशक्ति कुर्यादिति · अनेन चाघमर्षणकालीनावृत्तिभूयस्त्वे फलभूयस्त्वं दर्शितः । आज्याहुतिर
नेनैवेति वा उदाज्याहुतीः प्रत्यृचं जुहुयादित्यर्थः । एवमपि सूक्तस्य द्रष्टारं नारायणं होमांते चिंतयेच्चिंतनप्रका
रस्त्वविधानस्य वसमस्तैतज्जपविधानेनारभ्यवादे नोक्तः । ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजा
सनसंनिविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्र इति हिरण्मयवपुरित्यनेन
हिरण्यश्मश्रुरित्यादि छांदोग्यप्रसिद्धरूपचिंतनं सूचितं · ऊर्ध्वमिति मासादूर्ध्वमपि फलाहारेण · तत्तोक्तप्रका
रेण वर्षत्रयपर्यंतकृतेन जपेन स्वर्गं जयतीत्यर्थः । संस्कारपक्षेण कृतपत्नादेः पुरुषस्य पितृलोकप्राप्तिवदे
वास्वर्गप्राप्तिरिति बोध्यं · मुक्त इति क्रमविधानरवाक्यमग्रंथोक्तयोगाभ्यासं कुर्यादित्यर्थः ॥ अरण्ये इति · ध्या
नांतरत्यागेन नारायणमेव ध्यायादित्यर्थः । फलाहारउक्तप्रकारेण जपेदिति विशेषः । सगुणनिर्गुणसाक्षा
त्कारपूर्वकं परममुक्तिं दशवर्षजपस्य फलमाह · साक्षादिति · बलवत्प्रतिबंधेन साक्षात्कारालाभेपि प्रयत्न



वैफल्यमाशंक्याभिप्रायापीति · तत्रश्च वामदेववज्जन्मांतरलाभानंतरमुक्तजन्मकर्त्तारमुक्तफलभाजनमनु
कंपया कुर्यादेवेत्यर्थः । उक्तजपविधिना फलांतरसंयोगवक्तुमाह · येनेति · मासत्रिवर्षदशवर्षाभ्यंतरपक्षएवने
रंतर्यलाभार्थं सदेति · अनुक्रमनित्यस्य स्थाने · धो वरुमिति महार्णवे पाठः । चरुशब्दोत्र चरुहोमसंग्रहार्थः ।
उपहारशब्देन तद्दुरितपूजासंग्रहः प्रथमपादेऽनेनैवोभयसंग्रहः । तत्रश्च पुरुषसूक्तस्य होममात्रमपि सर्व
फलार्थं कार्यं · जपपूजाहोमात्मकं त्रयं वोक्तप्रकारेणे सर्वार्थमित्याशयः । अत्र सर्वत्र जपहोमविधिषु जपोऽयुतसं-
ख्याहोमः सहस्रसंख्य इति बोध्यं · महार्णवेन पुत्रार्थप्रथमपादेऽनुक्तसंख्येप्ययुतसंख्यजपस्य सहस्रसंख्या
होमस्यैव त्रिप्रकारविधिश्रवणात् · पूजार्थंतस्यैवस्यवन्याज्यस्वयमुपार्जितान् । आरण्यकविधानेन निर्वपे
त्प्रत्यहं चरुं · नारायणाय स्वाहेति मंत्रासे जुहुयाद्दुविः । आसहस्रात्तत्रश्चतुर्दिशं होतुर्दक्षिणैः । होतुर्हीमकर्तुः । अपि
वा चरुसाहस्रं त्रैतोकेन निर्वपेत् · यावत्तावपि शस्यं ते हूतान्सर्वान्समापयेदिति · आरण्यकविधानेन तिलोद्धा
न्यतरेण स्वयमुपार्जितानीति संबंधः । वन्यान्व्रीह्यादीन् · यद्वा अरण्ये निवसेदित्युपक्रम्यारण्यके जपेयद्विधान
मुक्तं स्नानकाले सूक्ते जपादि सूक्तेनादित्योपस्थानादि चरुहोममात्रं कुर्वतापि कार्यं · मंत्रांते पुरुषसूक्तांते । नाया-
यणाय स्वाहेति जुहुयादासहस्रादितिसंबंधः । केवलहोमपक्षएवैष विधिः । जपादिसमुच्चयपक्षे तु पुरुषसूक्तेनै
वहोम इति बोध्यं · एकनेति · इत्थंभावे तृतीया एकचर्वात्मनेत्यर्थः समापयेत् । एकेनेत्यनुष्टुप्छंदः सर्वाराधनात्मा

Indira Gandhi National Centre for the Arts

॥६॥ साधारणेनेति· भगवदर्पणार्हपत्रपुष्पविधिश्च तत्रैवोक्तः। बिल्वपत्रं शमीपत्रं पत्रं भृंगारकस्य च· मालतीकुशपद्मं च स
द्यस्तुष्टिकरं हरेः। पत्रोपपद्यते किंचित्तत्प्रायेण्मनसेवतु· संपद्यते प्रसादानुदेवदेवस्य चक्रिणः। पत्रैश्च पुष्पैश्च स
देवतोयैरक्रीतलब्धैश्च सदैव सत्· स्तुः मुक्तो कंकलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते न यत्न इति· केवलहोम
देवतायैरक्रीतलब्धैश्च सदैवसः· सुः मुक्तो ककलभ्ये पुरुषे पुराणो मुक्तौ किमर्थं क्रियते नयत्न इति· केवलहोम
पक्षे पूजापूर्वकमेव सकार्यः। सूक्तांतर्गतमंत्रैरग्निस्थापनादिहोमविधाने पूज्यदेवतादर्शिराः स्वस्वं डिलादिविधि
गर्भत्वात्· मासादिपरिमितजपादिघटितप्रयोगाप्रयोगांतर्विधावेवतात्पर्यमस्य केवलहोमविधेरिति बोध्यं· सर्वा
न्तेकर्तव्यमुक्तं पारिजाते· ततः प्रदक्षिणं कृत्वा नत्वा चैव समाहितः। बद्धा मुकुलमुद्रां तु ललाटोपरि संस्थितां। जप्ता
चैव यथाशक्त्या सूक्तं देवे निवेदयेत्· नदंते प्रपतो भूत्वा जितं त इति कीर्तयेत्· विसर्जनमनेनैव कर्मांते कारयेद्
धः। जानुभ्यां धरणीं तं मया· तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दनः शंखचक्रगदापाणिं ध्यात्वा विष्णुं समर्च
येत्· जनार्दने त्वं ते संप्रार्थ्य सूर्यमंडले· एवं हृदये च शंखादिधारणं विष्णुं ध्यात्वा षोडशभिः षोडशपुष्पाणपूर्व
सूर्यमुद्दिश्य योक्षिप्य जितं त इति मंत्रेण तावत्स्येव मूर्द्धनि निक्षिपेदित्यर्थः॥ एवमुक्तप्रकारमर्चनं कश्चिद्दिने
कर्तुमशक्तः पुरुषसूक्तमेव त्रिर्जपेत्· सहस्रशीर्षा सूक्तं तत्त्रिवादिने दिने। विष्ण्वादिसर्वदेवानां सर्वार्चन-
फलं लभेदिति· ज्येष्ठर्ग्विधाने तेः। अथोक्तवैष्णवजपादिकर्मणां पूर्वकर्तव्यांगमृग्विधानगतपरिभाषोक्तं
लिख्यतेः पुरश्चरणमादौ कर्मणां सिद्धिकारकं· स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद्द्विजः। केशश्म ॥६॥

अलोमनखान्वापयित्वा सुतः शुचिः। तिष्ठेदहनि रात्रौ तु शुचिरासीत वाग्यतः। सत्यवाक्च पवित्राणि जपेद्या हृत्यक्
षा· ओंकारणसु ताम्र जस्वासावित्रीं च तदिसर्चं· आपोहिष्ठेति सूक्तं तु शुद्धवत्यो घमर्षणं· स्वस्तिमत्स्च्याप
वमानस्तथैव च· सर्वत्रैतत्प्रयोक्तव्यमारावं तेच कर्मणां· आसहस्रादाशताद्वा द्वादशतमथवा जपेत्· ओंकारं व्याह
तीस्तिस्रः सावित्रीमथवा पुनः· तर्पयित्वा द्विजाचार्यान् षोडशांस्तिदेवताः। प्रपन्ने तविरूपाक्षं रौद्रमंत्रं गणां ज
पन्। न मातपितृविद्विष्टे नीचमन्येत कंचन· मंगलाचारयुक्तः स्यात् त्रिरहोभ्युपपादयः। अंते द्वादशरात्रस्य स्था
लीपाकं प्रकल्पयेत्· अग्नये चाग्नीषोमाभ्यां तीयाचांतयोः सह· वैश्वदेवी च रौद्री च तु हुयादुत्तरे ततः। अव
मानस्य पतयेतथानुमतयेति च· धन्वंतरयरत्यां गंधर्वाप्सरसामपि· दशमीब्राह्मणस्यस्यापरतु ब्रह्मणे
स्पृशाः सारस्वैन धाविश्चेरंत्या सोविष्टकृत्स्यपि· आज्याहुतय एवादौ स्थालीपाके तु सेपुनः। हुत्वाग्निं तर्पये-
द्विद्वान्पित्र्यमश्च प्रकल्पयेत्· ततः शेषं विधानेन शुचिर्भुंजीत वाग्यतः। कृच्छ्राणामेव सर्वेषां विधिरुक्तोनुपूर्वशः
। प्राजापत्यातिकृच्छ्रस्य तथा सांतपनस्य च· पराकस्य च कृच्छ्रस्य विधिश्चांद्रायणस्य च· एकेन शुद्धिमाप्नोति द्वाभ्यां
पापैः प्रमुच्यते। त्रिभिः सिध्यंति मंत्राश्च मुच्यते सर्वपातकैरिति· कर्मणामिन्निवक्ष्यमाणानां पूजाहोमादिप्रका
राणां सर्वकर्मणामादौ कृच्छ्रादयस्तत्तपसश्चरणं सिद्धेः कर्मजन्यफलभोक्तृतायाः कारकं· स्वाध्यायाभ्यस
नं च वक्ष्यमाणानीयासूक्तस्य तत्र स्यवाविदितेजपः। तदोदैतु प्राजापत्यमेव कुर्वीतः सर्वकृच्छ्रसाधारणोवि
धिः केशश्मश्र्वादि· अहनि जंस्तिष्ठेद्रात्रौ जपन्नासीत किमिति आकांक्षायामाह· पवित्राः पावनानि आहतपद्

Indira Gandhi National
Centre for the Arts

॥७॥ ति। प्रथमाद्द्वितीयार्थः जपप्रकारमाह· ॐकाराद्या इति व्याहृतीः तदित्यृचं त्सवितुर्वरेण्यमित्येताः शुद्धवत्यः इंद्र
घुद्धो न आगहीत्याद्याः स्वस्तिमत्यः स्वस्तिमत्य इंद्रो वृद्धश्रवा इत्याद्याः। पावमान्यः पावमानीः स्वस्त्ययनीरि
त्याद्याः। सर्वकृच्छ्रचांद्रायणेषु तेषामेवावांतरप्रकारत्वात् उक्तसकलमंत्रजपासंभवे प्रणवव्याहृतिपूर्वकं गाय
त्र्या एव पुनर्जपमादावंते च कुर्यात्· इहापि ह्यातदशावधि वेत्यनुवर्तते· प्रत्यहं जपांते आचार्यादितर्पणं कुर्यात्·
आचार्यानिति बहुवचनं प्रतिवेदमुपनयनाभिप्रायेणोपाध्यायभूयस्त्वाभिप्रायेण वा· येषां येषां मंत्राणां मध्य
यने उपाध्यायो यानि च तत्रर्षिछंदोदैवतानि तानि तर्पयित्वा कद्रुद्रायेत्यादि रौद्रमंत्रगणं जपन्बिल्वपत्रसहस्रादि
वं प्रपद्येत द्वादशरात्रस्येति ग्रहणात् द्वादशरात्रकृच्छ्रमेव वक्ष्यमाणधर्मान् तस्य त्याम्नायेषु गोदानादिषु ना-
पक्वचांतरेषु तयोः सहेत्याग्नीषोमीयामित्यर्थः। सो विहकल्पं ताश्चतुर्दश चर्वाहुतयो होतव्याः। तासामारा
वं ते च महाव्याहृतिभिस्तैत्तिरीयशाखाप्रसिद्धाभिर्भूरग्नये च पृथिव्यै चेति च तसृभिर्व्याहृतिभिराज्यं जुहुया
त्सूत्रांतरे दृष्टत्वादिति भाष्ये· पितृभ्यश्चेति· त[illegible]दुदृष्टो नापि ब्राह्मणान्भोजयेदित्यर्थः। एवं कृतकृच्छ्रेण
पि कर्मारंभात्पूर्वमुपवासत्रयं नक्तत्रयं कार्यं· त्रिरात्रमेवोपवासेऽशक्तः सर्वकर्मणां· त्रीणि नक्तानि वा कु
र्यात् ततः कर्मसमारंभ इति निबंधनात्· यजुर्विधाने तूक्तं पूतशरीरेण कर्मारंभः सर्वदा द्वादशरात्रं षड्रात्रं त्रिरात्रमेक
रात्रं वा कर्मांगप्रायश्चित्तानि कार्याणि· सर्वमंत्राणां पूर्वमेव· लक्षमयुतं सहस्रमिति सिध्यपेक्षया कार्यमि ॥७॥

त्ति· तथा सर्वत्रोंकारपूर्वाभिर्महाव्याहृतिभिराज्याहुतिसहस्रं जुहुयात् सर्वदेवताराधनसमर्थो भवतीति·
सामविधाने तु· कृच्छ्रोति कृच्छ्रः कृच्छ्र इति त्रयं प्रत्युक्तं· अथैतान्त्रीन्कृच्छ्रांश्चरित्वा सर्वेषु वेदेषु स्नातो भव-
तीति सर्वेषु वेदेषु भवतीति· अथातः स्वाध्यायाध्ययनस्य कामनकोपक्रमेत· अंते वा त्रीन्कृच्छ्रांश्चरित्वा
पूतो भवतीति· फलाशायां विधिविशेषोऽन्यत्र ऋग्विधाने होमः कार्यश्च गायत्र्या जुहुयाद्घृतं मधु· वेदमंत्रास्ततः
सम्यक् विज्ञाते कामधेनवः इति· तथा· तदर्थ एव विधिविशेषः कामे· महाभारते चोक्तं विष्णोर्नामसहस्रकं· नरी
यजपहोमाभ्यां समृद्धिः कर्मणां भवेदिति· अथ मासजपपक्षमवलंब्य जपसहितहोमात्मकः केवलहोमा-
त्मकः प्रत्येकं सहस्रनामजपादिसहितस्त्वरसहितश्चेति चतुर्विधः पुरुषसूक्तेन वै अवयागः प्रयोग उच्यते·
शुक्लैकादश्यां कस्यांश्चित्पूर्वं शुभदिने कृतनित्यक्रियाः कृतपवित्रपाणिराचम्य प्राणानायम्य सभार्यो देश
कालौ स्मृत्वा पुरुषसूक्तेन जपपूजाहोमात्मकं वैष्णवयागं कर्तुं तदधिकारार्थं कृच्छ्रत्रयं प्रायश्चित्तं चरिष्ये इति
संकल्प्योक्तपवनादिविधिना कृच्छ्रत्रयमाचरेत्· तत्स्वाम्नायत्वेन· गोत्रयं वा तन्निष्क्रयं वा दद्यात्· ततः शक
स्त्रीनुपवासानशक्तस्त्रीणि नक्तानि वा कुर्यात्· ततः एकादश्यां गणपतिसंपूज्य देशकालकीर्तनांते सर्वमं
गलांतर्वर्ति· श्रीनारायणप्रीत्यर्थं पुरुषसूक्तायुतजपं मासं फलाहारः सन्नस्त्यतः परतश्चाचरिष्ये इति संक-
ल्प्यः तत्फलसमृद्ध्यै विष्णुसहस्रनाम्नां सहस्रजपं च तदेवाचरिष्य इति संकल्प्य जापकान्वृणुयात्· यथाश

Indira Gandhi National
Centre for the Arts

पुरुषो नारायणो
॥८॥ भवं पूजयेन्नं । म. संविधयतां । शकः स्नाया स्नानकाले षोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः ॥ पुरुषो नारायणो
देवता । अनुष्टुप्छंदः । अंत्या त्रिष्टुप् । स्नाने वि० इति ऋष्यादिस्मरणपूर्वकं षोडशाभिर्मार्जनमघमर्षणं च कृत्वा
संध्योपासनांते आदित्यमंडले नारायणं ध्यायन् पुरुषसूक्तेनादित्यमुपतिष्ठेत । ततो भगवत्पूजागृहे प्राङ्मु
खः शुद्धासनउपविश्य करिष्यमाणपूजाजपांगत्वेन संकल्पपूर्वकं न्यासं कुर्यात् । ॐ सहस्रशीर्षेति वामक
रन्यासे । पुरुष एवेति दक्षिणकरे । एतावानस्येति वामपादे । त्रिपादूर्ध्व दक्षपादे । तस्माद्विराळिति वामजानु । यत्पुरु
षेति दक्षजानु । सप्तेति वामकटौ । तस्माद्यज्ञेति दक्षकटौ । तस्माद्यज्ञ ऋचः नाभौ । तस्मादश्वाः हृदये । यत्पुरुषं कंठे ।
ब्राह्मणोस्य वामबाहौ । चंद्रमा मनसेति दक्षबाहौ । नाभ्या आ० मुखे । सप्तास्यासन्निति नेत्रयोः । यज्ञेन यज्ञमिति
मूर्ध्नि । ततः पंचांगन्यासं कुर्यात् । ब्राह्मणोस्य हृदयाय । चंद्रमा० शिरसे । नाभ्या आ० शिखा० सप्तास्यास० कवचाय
हुं । यज्ञेन अस्त्राय फट् । एवमेव न्यासरूपं पूज्यमूर्तौ कृत्वा स्वासनि गंधाद्येकदेशेन भगवत्पूजां वा स्वभग्य
दासनपीठे पूजां च कुर्यात् । तद्यथा । पूज्य भगवदासनेक र्णिकायां आधारशक्त्यै नमः । प्रकृत्यै । कूर्माय । अनंताय । पृथिव्यै । क्षीर
निधये । श्वेतद्वीपाय । रत्नोज्ज्वलित मंडपाय । कल्पवृक्षाय । स्वर्णवेदिकायै । अथासनपादेषु । आग्नेये धर्माय । नैर्ऋ
त्ये ज्ञानाय । वायव्ये वैराग्याय । ईशाने ऐश्वर्याय । अथ गात्रेषु पूर्वस्मिन् । अधर्माय । दक्षिणतः अज्ञानाय । पश्चि
मे अवैराग्याय । उत्तरे अनैश्वर्याय । पुनः कर्णिकायां अनंताय । पद्माय । आनंदकंदाय । संविन्नालाय । प्रकृति- ॥८॥

मयपत्रेभ्यो । विकारमयकेसरेभ्यो । पंचाशद्वर्णकर्णिकायै । अं द्वादशकलात्मकसूर्यमंडलाय । उं षोडशकलात्मक
सोममंडलाय । मं दशकलात्मकवह्निमंडलाय । सं सत्वाय । रं रजसे । आं आत्मने । अं अंतरात्मने । ह्रीं ज्ञानात्मने । इति क
र्णिकायां । पूर्वादिपत्रेषु । विमलायै । उत्कर्षिण्यै । ज्ञानायै । क्रियायै । योगायै । प्रह्व्यै । सत्याय । ईशानायै । पुनः क
र्णिकायां । अनुग्रहायै । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः इति कर्णिका
यां पुष्पांजलिं दत्वा सत्वज्ञानारूपं परं धामैव सकलं पीठमिति संचिंतयेत् इति पीठपूजा । अथ यत्र स्था
पितप्रतिमायां पूर्वप्रतिष्ठायां आवाहनं कार्यं । नूतनायां वाकृतायामन्युत्तारणं । ॐ सहस्रशीर्षा ० दशांगुलं पुरुषो
त्तममावाहयामि । गृहावेप्रतिष्ठायां आवाहनं कार्यं । नूतनायां वाकृतायामन्युत्तारणं ध्येयः सदा सवित्रेत्या
दि ध्यात्वा सनदेयं । पुरुष एवेत्यासनः ततः पाद्यपात्रे शुद्धोदकं निक्षिप्य गंधपुष्पाक्षतश्यामाकदूर्वाकुशविष्णुक्रां
तातुलसीदलानि प्रक्षिप्य पाद्यं पादयोर्दद्यात् । एतावानस्येति पाद्यं । त्रिपादूर्ध्व अर्घ्यं । गंधादियुते जले यवकुशाग्र
तिलगौरसर्षपदूर्वातुलसीदलफलानि प्रक्षिप्यार्घ्यं दक्षिणहस्ते दद्यात् । पंचामृतेनाभिषिच्य यत्पुरुषेणेति स्नानं पुरुषसू
क्तेन च स्नापयेत् शुद्धोदकेन । तस्माद्विराळित्याचमनं । तं यज्ञेति वस्त्रं । तद्विष्णोरित्याभरणं तस्माद्यज्ञात्सर्वहुतः सं
उपवीतं । उपवीतानंतरं आचमनं । तस्माद्यज्ञात्सर्वहुत ऋचः सामेति गंधं । तस्मादश्वेति पुष्पं । देवस्य परितः परिवार
देवताभ्यः पुष्पाणि समर्प्य । यत्पुरुषं व्यदधुरिति धूपं । ब्राह्मणोस्येति दीपं । चंद्रमा मनसेति नैवेद्यं । तस्माद्यज्ञात्सर्वहुत ऋ
चः सामेति गंधं । तस्मादश्वेति पुष्पं । देवस्य परितः परिवारदेवताभ्यः पुष्पाणि समर्प्य । यत्पुरुषेणेति धूपं । ब्रा०

Indira Gandhi National
Centre for the Arts

॥८॥ सत्यस्येति दीपं॰ चंद्रमा मनसेति नैवेद्यं॰ तस्माद्गुणाल्लाचमनीयं॰ तद्विष्णोरित्याचम्य फलतांबूलं दत्वा॰ नाभ्या आसीदिति
पुष्पांजलिं॰ सप्तास्यासन्निति प्रदक्षिणीकृत्य॰ यज्ञेन यज्ञमिति नमस्कारं दक्षिणां यथाशक्ति समर्प्य पुनः प्रदक्षि-
णाः कुर्यात्॰ ततः प्राणानायम्य जपसंकल्पं कृत्वा दिक्स्मरणं पूर्ववत् न्यासं पंचांगन्यासं च कृत्वा प्रणवादिस्वाहांत
निरुक्तं जपं यथाशक्ति कृत्वा तत्सांगतायै विष्णुनाम स्मृत्वा पूजां जपं भगवते समर्प्य देवस्य दक्षिणे स्थंडिलादिक
तुं प्राङ्मुख उपविश्य होमसंकल्पं कृत्वा दिक्स्मरणं पूर्ववत् न्यासद्वयं च कृत्वा स्वगृह्योक्तपरिमाणं स्थंडिलं॰ ॐ स-
हस्रशीर्षेति कृत्वोपलेपनोल्लेखने च मंत्रे पुरुष एवेदमिति प्रोक्ष्य॰ ॐ एतावानस्येत्यग्निं प्रतिष्ठाप्य॰ ॐ त्रिपाद्
र्ध्व इति समिध्य प्रसिपणास्यगृह्योक्तविधानाग्नेश्च रुक्षापनांतं कृत्वा निरुप्तमाज्यं तस्माद्विराडित्यग्नावधिश्रित्य तेनैवै
व पवित्रे च कृत्वोत्पवेत्॰ विस्तृताभ्यां वा दक्षिणं सहस्रशीर्षं रक्ताक्षं कमललोचनमिति ध्यात्वाग्नौ भगवत्पूजां करिष्ये इति भगवत्प्रार्थ
नां कृत्वा ब्राह्मणैः कुरुष्वेति दत्तानुज्ञां भगवद्गतां चिंतयित्वा ॐ तं यज्ञमिति गंधं॰ तस्मात् संभृतं पुष्पाणि॰ तस्मा
दृचः धूपं॰ तस्मादश्वा दीपं॰ यत्पुरुषं नैवेद्यं॰ तद्विष्णोरित्याचम्य आचमनतांबूले दत्वा होमं करिष्य इत्यनुज्ञां प्रार्थ्य
पूर्ववत्तां प्राप्येध्महवनाद्याज्यभागांते तं यज्ञमिति दशभिर्ऋग्भिरभिघारिता दशाज्यस्याः समिधो जुहुयात्॰ जग
द्बीजाय पुरुषायेदमिति त्यागः। ताभिरेव दशाज्याहुतीर्जुहुयात्॰ तथा चर्वाहुतीः उभयत्र त्यागः पूर्ववत्। ततोऽग्निं
पर्युक्ष्य समापयेत्॰ अपराधसहस्राणि क्रियंतेऽहर्निशं मया॰ दासोयमिति मां मत्वा क्षमस्व परमेश्वरेति॰ ततः ॥८॥

स्वगृह्योक्तविधिना स्विष्टकृदादिहोमशेषं समाप्य स्तोत्रं करिष्य इत्यनुज्ञां प्रार्थ्य पूर्ववत्तां प्राप्यानिव्यवधायकचर्दिशाथपसा-
र्य तत्समीपे प्राङ्मुख उपविश्य अग्निस्थं भगवंतं ध्यात्वा स्तोत्रं पठेत्। जितंत इत्यादिस्तोत्रांते प्रदक्षिणनमस्कारौ कृ-
त्वा ललाटोपरि मुकुलमुद्रां बध्वा पुरुषसूक्तं यथाशक्ति जपित्वा देवे निवेद्यः भगवन्देवदेवेत्यादि जनार्दन नेत्यं तेन सं-
प्रार्थ्य सूर्यमंडलेस्थाग्निं शंखचक्रादिधारिणं विष्णुं ध्यात्वा षोडश पुष्पाणि ऊर्ध्वं सूर्यमुद्दिश्य प्रक्षिप्य जितंत इति
मंत्रेण तावंत्येव पुष्पाणि स्वमूर्ध्नि निक्षिप्य विसर्जनं जितंत इति मंत्रेण कृत्वा यांतु देवगणा इति प्रार्थ्य ब्राह्मणान्भो-
जयेत्॰ ततः स्वयं फलानि भुक्त्वा पयः प्राश्नीयात्॰ ततो भगवद्ध्यानादिना दिनमतिवाह्य निशायां नित्यकर्मांते ब्रह्म-
चार्यधःशायी स्वपेत्॰ अनेन दिने दिने विधिना मासमतिवाहयन् पुरुषसूक्तायुतं सहस्रनाम्नां सहस्रं पंच समा-
प्यानंतरं शुक्लैकादश्यां कृतस्नानादिनित्यक्रियः शुचौ देशे षोडशहस्तं चतुर्द्वारं द्वारेभ्यो बहिर्हस्तमात्रावधि निर्मि-
तशांत्यादिविन्हितचतुस्तोरणं मध्ये वेदिकायुक्तं तद्दक्षिणतो योन्यादियुक्तकुंडमंडपं विरध्यात्॰ वैष्णवयागे तोरणे
परिकीलाः शंखचक्रगदाब्जभाः कार्या इत्युपपन्नस्य एव वा ज्ञपेपि नानस्याधकत्वेन वास्तुशास्त्रोदाहरणात्॰ लक्ष-
होमार्थं कुंडे भुजो हस्तचत्वारिंशदंगुलमिति॰ अयुतहोमार्थं द्विहस्तद्व्यंगुलका चतुष्टयसमयवाधिकत्रयस्त्रिंशदं-
गुलमितिः। सहस्रहोमे चतुर्विंशत्यंगुलमितः। कुंडमंडपविधिश्च वक्ष्यं च निसुरराजस्य कृतस्मृतिकौस्तुभे मा
धकृष्णसदीधितो द्रष्टव्यं। अथ लक्षब्राह्मणानुज्ञः सपत्नीको यजमानः आचांतो देशकालौ स्मृत्वा सूर्यमंडलां

Indira Gandhi National
Centre for the Arts

॥१०॥ तर्वर्ति श्रीनारायणः प्रीतिकामः कारिलअपरदाहासंख्यया विष्णुसहस्रनामकरणकहोमसहितंपुरुषसूक्तकरण
कहोमात्मकं वैष्णवयागं सग्रह मखं करिष्ये इति संकल्प्य तदंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नां
दीश्राद्धं आचार्यादिवरणं च करिष्ये · तदादौ गणपतिपूजनं करिष्य इति संकल्पयेत् · केवलहोमपक्षेतु संकल्प
दिनात् पूर्वमेव कुचित्सुदिने करिष्यमाण विष्णुयागाख्यहोमधिकारसिध्यर्थं कृच्छ्रत्रयमुपवासत्रयं च संकल्पपूर्व
कं कृत्वा कृत्वा एकादश्यां प्रीतिकाम इत्यंते विष्णुसहस्रनामकरणकघृतसंख्यहोमसहितं पुरुषसूक्तकरणक
सहस्रसंख्यहोमं सग्रहमखं करिष्ये इति संकल्पे विशेषः । सहस्रनाम होमाभावपक्षे तत्संकीर्तनाभावः ततः स्व
शाखीयप्रकारेण नांदीश्राद्धं कुर्यात् · कात्यायनानुसारेणां वसोर्द्धारापूजनमधिकं · ततः आचार्यादिवरणं · एतस्य
यागस्य सिद्ध्यर्थं भो त्वामाचार्यत्वेन वृणे · आचार्य
वरान्वितेन नृणो नाम्नैन देशान्तर्गतेन द्वारकाध्यापिनमेतन्नामानं त्वामेभिर्वस्त्रादिभिराचार्यत्वेन वृणे · आचार्य
सु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रतेति · एवं ब्रह्मादिवरणमंत्रे विशेषः । यथा
चतुर्मुखो ब्रह्मा स्वर्गे लोकपितामहः । तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तमेति · अस्य यागस्य निष्पत्तौ भवंतोभ्य
र्थिनाम याः सुप्रसन्नैः प्रकर्तव्यमार्त्विज्यं विधिपूर्वकमिति · एकः सर्वानाचार्यमेव वा मधुपर्केणार्हयेत् · ततः मं
डपपश्चिमे देशे उपविश्य गंधपुष्पदूर्वाफलयवयुक्तं ताम्रपात्रमादायोदङ्मुखः कृतांजलिरर्घ्यं दद्यात् · आगच्छ ॥११॥
सर्वकल्याणि वसुधे लोकधारिणि · उद्धृतासि वराहेण सशैलवनकानना · मंडपं कारयाम्यद्य त्वदूर्ध्वं शुभेत ·

स्वरां · गृहाणार्घ्यं मया दत्तं प्रसन्ना वरदा भवेति · बध्वांजलिः स्योना पृथ्वीति प्रार्थयेत च · ततः सपत्नीको यजमानः
पूर्वं कृतांजलिहस्ते आचार्यैराचार्यादिभिः सह भद्रं कर्णेभिरिति मंत्रं पठन् मंगलवाद्यघोषेण मंडपं प्रदक्षिणीकृत्य
पश्चिमद्वारेण प्रविशेत् · ततः मंडपपश्चिमदेशे उपविश्य विष्णुयागांगत्वेन मंडपदेवताप्रतिष्ठापनं करिष्ये इति संक
ल्पयेत् · ततः आचार्यो यदत्र संस्थितं भूतमिति मंत्रं पठन् दिक्षु प्रागादिक्रमेण सर्षपान्विकीर्य शुचीवो हव्येति पंच
नव्येन कुशैः प्रोक्ष्य पौर्णाहिकं तिलकेनाभिषिच्य प्राक्प्रस्य कृतांजलिः स्वस्त्ययनं तार्क्ष्यमिति सूक्तं पठित्वा वेद्यां मध्ये दलं वा
विरच्य प्राच्यां सुदृढतोरणमाश्वत्थं निदध्यात् · अग्निमीळ इति · ततः सुदृढतोरणाय नमः इति गंधादिपंचोपचा
रैः पूजयेत् · तत्रैव हुव बृहस्पतीन्द्रस्य गंधादिना संपूज्य महीद्यौरित्यादिकलशस्थापनविधिना पूर्णपात्रवीतपू
र्णपात्रनिधानांतं कलशस्थापनान्तं कृत्वा तस्मिन्ध्रुवमावाहयामीति ध्रुवनावाहनपूर्वकं ध्रुवायनमः इति मंत्रेण षोड
शभिः पंचभिर्वोपचारैः पूजयेत् · ततः इषेत्वोर्जेत्वा · कर्मणा इति मंत्रेण चक्रचिन्हितमौदुंबरं सुभद्रं नाम तोरणं इति द
क्षिणे निधाय सुभद्रतोरणाय नमः इति संपूज्य सर्वीगारकौन्यस्य संपूज्य कलशस्थापनान्ते तत्र धरायै नमः इति धरा
मावाह्य पूजयेत् · अग्न आयाहीति मंत्रेण गदाचिन्हितं प्लक्षं सुकर्मं तोरणं पश्चिमे निधाय सुकर्मतोरणाय नमः इति
संपूज्य तत्र सोमकेतुपानीन्यस्य कलशस्थापनान्ते मंत्रावरुणावाह्य विघ्नेशाय नमः इति पूजयेत् · ततः पूर्व द्वारे मही
द्यौरित्यादिमंत्रावृत्त्या कलशौ संस्थाप्य तत्रैव तन्मात्रावाह्य संपूज्य · ऋग्वेदः पद्मपत्राक्षो · भवेदिति आवाह्याक्र ·

Indira Gandhi National
Centre for the Arts

॥११॥ मेघदिनौ शांतिपाठार्थं वृत्वाग्निमील इति प्रत्येकं गंधादिना संपूज्य तत्र कलशद्वये एह्येहीति मंत्राभ्यां भो इंद्र इहागच्छे
हतिष्ठ इंद्रं सांगं सपरिवारं सायुधं सशक्तिकमावाहयामीत्यावाह्य त्रातारमिति संपूज्य आशुः शिशान इति मं-
